षोड़शाङ्गः, पुं,(षोड़श द्रव्याणि अङ्गानि यस्य ।) षोड़शप्रकारसुगन्धिद्रव्यमिश्रितधूपः। यथा,—
"गुग्गुलुं सरलं दारु पत्रं मलयसम्भवम् ।
ह्रीवेरमगुरुं कुष्ठं गुड़ं सर्ज्जरसं घनम् ॥
हरीतकीं नखों लाक्षां जटामांसीञ्च शैलजम् ।
षोड़शाङ्गं विदुर्धूपं देवे पैत्रे च कर्म्मणि ॥"
इति तन्त्रसारः ॥
षोड़शावयवयुक्ते, त्रि ॥

षोड़शाङ्घ्रिः, पुं,(षोड़श अङ्घ्रयो यस्य ।) कर्कटः । इति हेमचन्द्रः ॥ षोड़शचरणयुक्ते, त्रि ॥

षोड़शारं, क्ली, (षोड़श अराणि इव दलानि यस्य ।) षोड़शदलपद्मम् । यथा, तन्त्रे ।
"आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे
द्वे पत्रे षोड़शारे द्विदशदशदले द्वादशार्द्धे चतुष्के ।
वासान्ते वादिलान्ते ड-फ-क-ठ-सहिते कण्ठदेशे स्वराणां
हंक्षौ कोदण्डमध्ये सकलदलगतं वर्णरूपं नमामि ॥"
जलाशयोत्सर्गीयवेदिकोपरिकर्त्तव्यचक्रम्। यथा, मत्स्यपुराणे ।
"रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन तत्त्ववित् ।
षोड़शारं भवेच्चक्रं पद्मगर्भं चतुर्म्मुखम् ॥
चतुरस्रन्तु परितो वृत्तं मध्ये गुणोत्तरम् ।
वेदाश्चोपरि तत् कृत्वा ग्रहाल्लोकपतींस्तथा ।
विन्यसेन्मन्त्रतः सर्व्वान् प्रतिदिक्षु विचक्षणः ॥"
इति जलाशयोत्सर्गतत्त्वम् ॥

षोड़शार्च्चिः, [स्] पुं, (षोड़श अर्च्चींषि यस्य ।) शुक्रग्रहः । इति भूरिप्रयोगः ॥ षोड़शशिखायुक्ते, त्रि ॥

षोड़शावर्त्तः, पुं, (षोड़श आवर्त्ता यस्य ।) शङ्खः । इति हेमचन्द्रः ॥ षोड़शावर्त्तनयुक्ते, त्रि ।

षोड़शिका, स्त्री, पलपरिमाणम् । इति वैद्यकपरिभाषा ॥

षोड़शी, [न्] पुं, यज्ञपात्रविशेषः । यथा अतिरात्रे षोड़शिनं गृह्णाति नातिरात्रे षोड़शिनं गृह्णातीति । षोड़शी ससोमकपात्रविशेषः । इति मलमासतत्त्वम् ॥

षोड़शी, स्त्री, द्वादशमहाविद्यान्तर्गतविद्याविशेषः । यथा,—
"काली तारा महाविद्या षोड़शी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
वगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः ॥"
तत्र पारिभाषिकी षोड़शीमाह ज्ञानार्णवे ।
"चन्द्रान्तं वारुणान्तञ्च शक्रादिमहितं पृथक् ।
वामाक्षिबिन्दुनादाढ्यं विश्वमातृकलात्मकम् ॥
विद्यादौ योजयेद्देवि साक्षात् जाग्रत्स्वरूपिणी ।
त्रिकूटा सकला भद्रा पञ्चकूटा भवन्ति हि ।
वैष्णवी वसुकूटा स्यात् षट्कूटा शाङ्करी भवेत् ॥"
अस्यार्थः चन्द्रान्तं हकारः । वारुणान्तं शकारः । शक्रादौ रेफः । वामाक्षि ईकारः । विद्यादौ पूर्व्वोक्तद्वादशविद्यादौ ।
"वेदादिमण्डिता देवि शिवशक्तिमयी सदा ।
तदा भेदास्तु सकलाः षट्कूटा परमेश्वरि ।
वैष्णवी नवकूटा स्यात् सप्तकूटा च शाङ्करी ॥"
अस्यार्थः शिवशक्तिमयी पूर्व्वोक्ता बीजद्वयवती । वेदादिः प्रणवः । मण्डिता आदौ भूषिता ॥*॥ अथ महाषोड़शी ।
"आद्यबीजद्वयं भद्रे विपरीतक्रमेण हि ।
विलिख्य परमेशानि ततोऽन्यानि समुद्धरेत् ॥
अन्तर्म्मुखी वरारोहे कुमारी त्रिपुरेश्वरी ।
एभिस्तु पञ्चसंख्याकैर्बीजैः संपुटितां यजेत् ॥
षट्कूटां परमेशानि विद्येयं षोड़शाक्षरी ।
त्रिकूटाः सकला भद्रे षोड़शार्णा भवन्ति हि ।
वैष्णव्येकोनविंशार्णा शैवी सप्तदशाक्षरी ॥"
अस्यार्थः । आद्यबीजद्वयं मायारमात्मकम् । विपरीतक्रमः आदौ रमा पश्चान्माया । अन्तर्मध्ये स्थितं कामबीजं मुखे आदौ यस्याः कुमार्य्याः । एभिः पञ्चसंख्याकैर्बीजैः षट्कूटां सप्तकूटां नवकूटां वा संपुटितां संपुटवत् कृतां तेनानुलोमविलोमतः संपुटितामित्यर्थः । योगिनीतन्त्रे ।
"श्रीबीजमायास्मरयोनिशक्ति-
स्तारश्च माया कमलाथ विद्या ।
शक्त्यादिबीजैश्च विलोमतोक्त्या
श्रीषोड़शीयञ्च शिवप्रदिष्टा ॥"
तथा च रुद्रयामले ।
"श्रीर्म्माया मदनो वाणी परा तारं शिवप्रिया ।
हरिप्रिया त्रिकूटा सा परा वाणी मनोभवः ।
मातालक्ष्मीर्महाविद्या श्रीबीजं षोड़शी परा ॥"
अथ बीजावली षोड़शी । रुद्रयामले ।
"श्रीबीजमाये संलिख्य तथैव च कुमारिकाम् ।
श्रीबीजमाये कामञ्च वाङ्माया कमला तथा ॥
परां कामञ्च वाग्बीजं माया श्रीबीजमेव च ।
बीजावली षोड़शीयं सर्व्वतन्त्रेषु गोपिता ॥
राज्यं देयं शिरो देयं न देया षोड़शाक्षरी ॥"*॥
तन्त्रान्तरे ।
"आद्या कुण्डलिनी शक्तिः शक्तिराद्या ततः परा
निविशयेत्तयोर्म्मध्ये देवि गोविन्दवल्लभाम् ॥
ततस्तु मन्मथं बीजं श्रीबीजं तदनन्तरम् ।
हृल्लेखा रमयोर्व्वक्त्रे वेदवक्त्रं विनिःक्षिपेत् ॥
ततो लोपा न्यसेद्देवि त्रिकूटामथवा पराम् ।
आद्यानि पञ्चबीजानि पश्चाद्विन्यस्य सुन्दरि ।
षोड़शीयं सुगोप्या हि स्नेहाद्देवि प्रकाशिता ॥
अस्या माहात्म्यमतुलं ब्रह्मकोटिशतैरपि ।
वक्तुं न शक्यते देवि किं पुनः पञ्चभिर्म्मुखैः ॥
अपि प्रियतमं देयं सुतदारधनादिकम् ।
राज्यं देयं शिरो देयं न देया षोड़शाक्षरी ॥"
तन्त्रान्तरे ।
"सिन्दूररजसा वापि कुङ्कुमेन विलेपिते ।
निखिला दर्शयेद्भूमौ न च कर्णे प्रकाशयेत् ॥
ततः स्वात्मविशुद्ध्यर्थं लक्षमेकं जपेद्गुरुः ॥"*॥
बीजषोड़शीमाह । सिद्धयामले ।
कामो माया रमा बाला त्रिकूटा स्त्री भगाङ्कुशौ ।
काली कामकला कूर्च्चं सर्व्वादौ प्रणवः प्रिये ॥
श्रीमहाषोड़शीयञ्च या ख्याता भुवनत्रये ।
ज्ञानेन मृत्युहा विद्या सर्व्वाम्नायैर्नमस्कृता ॥
सप्तलक्षमहाविद्यास्तन्त्रादौ कथिताः प्रिये ।
सारात्सारतरा भूता या या विद्याः सुगोपिताः ॥
बहुना किमिहोक्तेन तासां सारा तु षोड़शी ।
प्रकाशिता महादेवो या दृष्टा तैः पुनः पुनः ॥"*
शाक्तकामराजन्तु श्रीक्रमे ।
"मायाबीजं तथा झिण्टी कामं शक्रं वियत् क्रमात् ।
जातवेदो मृगाङ्केन लाञ्छितं परमेश्वरी ॥
एतद्वाग्भवकूटञ्च पूर्व्ववत् कामराजकम् ।
तथैव शक्तिबीजन्तु सुन्दर्य्येषा प्रकीर्त्तिता ॥"
अत्रापि पूर्व्ववद्बीजसंयोगः । माया ईकारः । झिण्टी एकारः । पुनः शाक्तमाह ।
"एतद्गं ततो माया ब्रह्मा शक्रो हरोऽग्निना
वामनेत्रेण संयुक्तो नादबिन्दुविभूषितः ।
एतद्वाग्भवमुद्दिष्टं पूर्व्ववत् कामशक्तिकम् ॥"
भग एकारः । अत्रापि पूर्व्ववद्बीजसंयोगः। अत्र विशेषः ।
"ब्रह्मबीजं यदा दद्यात् त्रिकूटेषु वरानने ।
प्रथमा सुन्दरी देवी द्वितीया ब्रह्मसुन्दरी ॥
शक्तिकूटे महेशानि अनन्तसुन्दरी मता ।
एषा तु सुन्दरी विद्या मतभेदेन दर्शिता ॥
त्रिकूटान्ते हंसबीजं बिन्दुसर्गविभूषितम् ।
एषा श्रीप्राणसंयुक्ता दारिद्र्यदुःखमोचिनी ॥"
इति तन्त्रसारः ॥ * ॥
ऊनविंशतिपिण्डदानक्रिया । यथा,—
प्रेतशिलोक्तरीत्या द्वादशपिण्डान् षोड़शीपिण्डांश्च दद्यात् । इति तीर्थयात्राप्रयोगतत्त्वम्
तद्विधानं यथा,—
"अमावस्यान्तु कन्यार्के तीर्थप्राप्तौ तथा नृप
कृत्वा श्राद्धं विधानेन दद्यात् षोड़शपिण्डकम्॥
वायुपुराणीयस्तत्प्रयोगो यथा । ऊनविंशतिदास्यमानपिण्डस्थानानि यथादक्षिणं भागचतुष्टयेन कृतानि तत्र दक्षिणाग्रान् कुशान् आस्तीर्य्य ।
"अस्मत्कुले मृता ये च गतिर्येषां न विद्यते ।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे तिलोदकैः॥
मातामहकुले ये च गतिर्येषां न विद्यते ।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे तिलोदकैः
बन्धुवर्गकुले ये च गतिर्येषां न विद्यते ।
आवाहयिष्ये तान् सर्व्वान् दर्भपृष्ठे तिलोदकैः॥"
इत्येतैस्तिलोदकैरावाह्य ।
"आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु पितरः सर्व्वे मातृमातामहादयः ॥
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।
आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ।'